# संस्कृत वार्ता:

दिनाङ्क : 14/10/2026 सायम् : 06:20

<u>आदौ मुख्यवार्ता:</u>

- केन्द्रीय-मन्त्रिमण्डलस्य महती स्वीकृतिः। एकादश दशांश चतु शून्यं लक्ष परिमितेभ्यः रेल-कर्मचारिभ्यः अष्टसप्ततिः दिनानाम् पारितोषिकं अनुमोदितम्। 'राष्ट्रिय-सामाजिक-सहायता-कार्यक्रमः' च एकत्रिंशदुत्तरद्विसहस्रतमवर्ष-पर्यन्तं विस्तारितः।
- वित्तीयक्षेत्रे मन्त्रिमण्डलस्य ऐतिहासिकः निर्णयः । सूक्ष्म-लघु-मध्यम-उद्यमानां नूतन-उद्यमानां च संवर्धनाय 'आई.डी.बी.आई. बैंक'-संस्थायाः रणनीतिक-पुनर्संरचनायै मन्त्रिमण्डलस्य स्वीकृतिः।
- जागतिक-ज्ञान-सांस्कृतिक-आदान-प्रदानेषु भारतस्य ऐतिहासिकम् अवदानम् अद्य प्रधानमन्त्रिणा नरेन्द्र-मोदिना सप्रश्रयं समुद्घोषितम्।
- भारत-कनाडा-देशयोः रणनीतिक-सहभागितायाः नूतनः अभ्युदयः, वाणिज्य-ऊर्जा-रक्षा-शिक्षा-क्षेत्रेषु परस्पर-सहयोगस्य दृढीकरणाय सङ्कल्पः।
- हैदराबाद-नगरे अद्य भारत-वेस्टइण्डीज-दलयोः चतुर्थः टी-२० अन्ताराष्ट्रिय सम्मुखीकरणं भविष्यति।

---------------------------------------------

<u>केन्द्र-रेल</u>

उत्कृष्ट-प्रदर्शनाय चत्वारिंशत सहस्रोत्तर एकादश लक्ष-रेल-कर्मचारिणः अष्टसप्ततिः दिनानां वेतनतुल्यं उत्पादकता-सम्बद्ध-पारितोषिकं लप्स्यन्ते। मन्त्रिमण्डलस्य निर्णयं श्रावयता अश्विनी-वैष्णवेन प्रोक्तम् यत् पर्वणः प्राक् दीयमानं एतत् पारितोषिकं कर्मचारिणां कार्य-प्रेरणाम् उत्कर्षयिष्यति।

---------------------------------------------

<u>केन्द्रीय-मन्त्रिमण्डलेन</u>

केन्द्रीय-मन्त्रिमण्डलेन 'राष्ट्रिय-सामाजिक-सहायता-कार्यक्रमस्य' आगामी-पञ्च-वर्षाणां कृते अष्टविंशत्युत्तर चतुः शतोत्तर त्रिपंचाशत् कोटि-रुप्यकाणां व्ययेन विस्तारः स्वीकृतः। अनेन दिव्यांगजन-पेंशन-राशिः वर्धिता, दिव्यांगतायाः मानदण्ड-सीमा अशीतिप्रतिशततः न्यूनीकृत्य चत्वारिंशत् प्रतिशतं विहिता, तथा हि न्यूनतम-वयः-सीमा 'जन्मतः एव' निर्धारिता इति सूचना-मन्त्रिणा अश्विनी-वैष्णवेन समाख्यातम्।

------------------------------------------

<u>मन्त्रिमण्डलस्य - 'आई.डी.बी.आई.</u>

केन्द्रीय-मन्त्रिमण्डलस्य महती स्वीकृतिः। 'आई.डी.बी.आई. बैंक'-संस्थायाः रणनीतिक-पुनर्संरचना निर्णीता। मन्त्रिमण्डलस्य उपवेशनान्तरं नवदेहल्यां वार्ताहरान् सम्बोधयन् सूचना-प्रसारण-मन्त्रिणा अश्विनी-वैष्णवेन समाख्यातम् यत् देशस्य सूक्ष्म-लघु-मध्यम-उद्यमानां तथा नूतन-औद्योगिक-उपक्रमाणां समभ्युदये अस्याः संस्थायाः महती भूमिका वर्तते। मन्त्रिणा निगदितं यत् बैंक-संस्थानस्य समृद्धये रणनीतिक-सहयोगी चयनितः अस्ति, यस्य साहाय्येन अस्यां संस्थायाम् अभिनव-मूलधनस्य प्रवाहः विधास्यते। अश्विनी-वैष्णवेन एतदपि स्पष्टीकृतम् यत् पुनर्संरचितायां संस्थायां भारत-सर्वकारः भारतीय-जीवन-बीमा-निगमः च उभौ मिलित्वा चतुस्त्रिंशत् प्रतिशतं स्वामित्वांशं स्व-समीपे एव रक्षिष्यतः।

------------------------------------------

<u>पीएम-शेखावतः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य प्रतिपादितं यत् देशस्य सभ्यता-यात्रा शतकानां सांस्कृतिक-विनिमयेन ज्ञान-सहभाजनस्य च परम्परया निरूपिता वर्तते। विश्वे भारतस्य सांस्कृतिक-सम्पर्कानाम् उपरि आयोजितायाः अन्ताराष्ट्रिय-सङ्गोष्ठ्याः उद्घाटन-सत्रे प्रेषिते सन्देशे प्रधानमन्त्री अवोचत् यत् नालन्दा-सदृशैः प्राचीन-ज्ञान-केन्द्रैः भारतस्य एशिया-महाद्वीपस्य च अन्य-भागानां मध्ये ज्ञान-विनिमयः सुदृढः जातः। तेन विशेषतया प्रतिपादितं यत् संन्यासिनः, विद्वांसः, वणिजः , पर्यटकाश्च स्थल-जल-मार्गैः भारतीय-विचारान्, दर्शनं च सम्पूर्णे विश्वे प्रसृतवन्तः। प्रधानमन्त्रिणः अयं सन्देशः संस्कृति-सचिवेन विवेक-अग्रवालेन सम्मेलने पठितः ।

-----------------------------------------

## भारत-कनाडा

भारत-कनाडा-देशयोः मध्ये व्यापक-आर्थिक-सहभागिता-संधिं लक्ष्यीकृत्य सम्भाषणानि त्वरित-गतिं प्राप्तानि। ओटावा-नगरे निर्वृत्तात् पञ्चम-चक्र-विचार-विमर्शानन्तरं, षड्विंशत्युत्तरद्विसहस्रतम ख्रिष्टाब्दस्य पर्यन्तम् अस्य आर्थिक-सन्धेः निष्पादनं सम्भाव्यते। अनेन द्वयोः राष्ट्रयोः द्विपक्षीय-वाणिज्य-निवेशयोः सुदृढता अभ्युदेष्यति।

-----------------------------------------

## पीयूष-गोयल

वाणिज्य-तथा-उद्योग-मन्त्रिणा पीयूष-गोयलेन समाख्यातम् यत् भारतेन गतेषु चतुर्षु वर्षेषु अष्टात्रिंशत् विकसित-राष्ट्रैः सह प्राधान्य-व्यापार-संधयः साधिताः। अद्य नवदेहल्याम् आयोजितस्य 'ब्लूमबर्ग-न्यू-इकॉनमी-फोरम्' इत्याख्यस्य मञ्चस्य उपवेशने भाषमाणः श्रीगोयलः अवदत् यत् वैश्विक-सहयोगिभ्यः स्व-विपणनानि उद्घाटयन् एव भारत-देशः भारतीय-उद्यमानां कृतेऽपि विपणि-प्रवेशस्य व्यापकं विस्तारं विधातुं कटिबद्धः अस्ति।

-----------------------------------------

## जयशङ्कर-कनाडा

विदेशमन्त्री डा.एस.जयशङ्करः अथ च कनाडादेशस्य विदेशमन्त्री अनिता-आनन्दः अद्य व्यापार-निवेश-शिक्षणोर्जा-रक्षा-जनात्-जन-सम्पर्कक्षेत्रेषु भारत-कनाडा-सम्बन्धानां प्रगतेः समग्र-समीक्षां कृतवन्तौ। उभयोः विदेशमन्त्रिणोः मध्ये अद्य नवदिल्ल्यां द्विपक्षीयवार्ता सम्पन्ना।

सामाजिक-सञ्चारपटले डा.जयशङ्करेण संसूचितं यत् वार्ताकाले प्रमुख-क्षेत्रीय-वैश्विक-विषयेषु अपि उभयपक्षीय-विचार-विनिमयो जातः । सः अवोचत् यत् दृढ-नेतृत्वस्य शासनोद्योगयोः च सतताभिसन्धानस्य बलेन भारत-कनाडा-देशौ रणनीतिक-सहभागितां नूतनामुन्नतिं नयतः। अपरत्र कनाडा-देशस्य विदेशमन्त्रिणा अनिता-आनन्देन प्रतिपादितं यत् भारत-कनाडा-सम्बन्धेषु साम्प्रतिकी प्रगतिः अतीवोत्साहवर्धिका वर्तते, यत्र व्यापार-वार्ताभ्यः आरभ्य ऊर्जा-नवाचार-

सुरक्षा-क्षेत्रेषु सहयोगस्य महती वृद्धिः सञ्जाता। सामाजिक-सञ्चारपटले सा न्यरूपयत् यत् अस्य द्विपक्षीय-सम्बन्धस्य वास्तविकं महत्त्वं तयोः उपलब्धिषु निहितम् अस्ति याः उभौ देशौ मिलित्वा सम्पादयितुं शक्नुतः। सा अग्रे अवदत् यत् यदा अन्ताराष्ट्रिय-व्यवस्थायाम् आधारभूत-परिवर्तनानि जायमानानि सन्ति, तस्मिन् काले भारत-कनाडा-देशयोः निकट-सम्पर्कः भविष्यस्य समृद्धेः स्वरूप-निर्धारणाय अथ च उन्मुक्त-स्थिर-समृद्ध-हिन्द-प्रशान्त-क्षेत्राय सकारात्मक-योगदानं दातुम् एकम् उत्तमम् अवसरं प्रददाति।

-------------------------------------------

## न्यायालयः - सी जे पी

देहल्याः विशेष-कार्यपालक-दण्डाधिकारी-न्यायालयः अद्य सी जे पी इत्यस्य दलस्य नेतारौ सौरभ-दास तथा आशुतोष-रङ्का इत्येतौ पञ्च-दिवसीयस्य न्यायिक-कारावासे प्रेषितवान्, यदा च अन्यः नेता अजिङ्क्य-शिंदे वैयक्तिक-प्रत्याभूति-पत्रेण विमुक्तः। जन्तर-मन्तर-स्थलस्य विरोध-प्रदर्शन-स्थानत्वेन निषेधानन्तरदिने तत्र प्रवेष्टुं प्रयतमानानाम् आरोपेण देहली-आरक्षकाधिकारिभिः त्रयोऽपि नेतारः निगडिताः।

-------------------------------------------

## राजनाथ-आसियान

रक्षामन्त्रिणा राजनाथसिंहेन प्रतिपादितं यत् शान्तिपूर्णस्य, स्थिरस्य, उन्मुक्तस्य च हिन्द-प्रशान्त-क्षेत्रस्य निर्माणे भारतस्य आसियान-सङ्घटनस्य च गभीरा रुचिः वर्तते । अद्य प्रातः नवदिल्ल्यां भारत-आसियान-रक्षा-चिन्तक-मञ्चः सम्बोधयता श्रीसिंहेन स्पष्टीकृतं यत् भारतस्य हिन्द-प्रशान्त-दृष्टिकोणे आसियान-सङ्घटनं केन्द्रीय-महत्त्वं भजते, अथ च भारतस्य एक्ट-ईस्ट-नीतिः दक्षिण-पूर्व-एशिया-देशैः सह सहभागित्वेन कार्यं कर्तुं दीर्घकालिकी प्रतिबद्धता वर्तते। मञ्चस्य कृते व्यावहारिक-पदक्षेपाणां रूपरेखां प्रस्तुवन् रक्षामन्त्री समुद्री-सुरक्षा, आपत्प्रबन्धनम् सायबर-सङ्कटानि अथ उदीयमान-प्रौद्योगिकी-विषयेषु केन्द्रितं भारत-आसियान-संयुक्त-अनुसन्धान-कार्यविवरणं विकसितुं प्रस्तावम् उपस्थापितवान्। षड्विंशत्यधिक-द्विसहस्रतमस्य वर्षस्य भारत-आसियान-समुद्री-सहयोग-वर्षरूपेण निर्देशं कुर्वन् सः समुद्री-क्षेत्र-जागरुकतायाः दृढीकरणाय, सूचना-आदान-प्रदानस्य परिष्काराय अथ च आपत्कालीन-स्थितिषु, समुद्री-

दस्युतायां अवैध-मत्स्य-ग्रहण-कार्याणाम् निवारणाय सामूहिक-क्षमता-निर्माणाय आह्वानम् अकरोत्।

-------------------------------------------

## पीएम-एशियाईक्रीडा

प्रधानमन्त्री नरेन्द्रमोदी श्वः नवदिल्ल्यां षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य एशियाई-क्रीडा-स्पर्धासु भागं गृहीतवता भारतीय-क्रीडकदलेन सह संवादं करिष्यति। अवसरेऽस्मिन् प्रधानमन्त्री उपस्थित-क्रीडकानपि सम्बोधयिष्यति। जपान-देशस्य आइची-नागोया-नगरे सम्पन्नासु एशियाई-क्रीडासु भारतेन एकविंशति-स्वर्णपदकानि, सप्तविंशति-रजतपदकानि, अथ च सप्तत्रिंशत-कांस्यपदकानि समेत्य पञ्चाशीति-पदकानि विजित्य पदकतालिकायां चतुर्थं स्थानं प्राप्तम्। एशियाई-क्रीडासु शीर्ष-पञ्चदेशेषु भारतस्य इदं द्वितीयं निरन्तरं स्थानम् अस्ति । एतत् तावत् विविध-क्रीडा-विधासु देशस्य वर्धमानं प्रतिस्पर्धा-सामर्थ्यं स्पष्टतया प्रदर्शयति।

-------------------------------------------

## ऋतु विभाग

अद्यतन-ऋतु-वृत्तान्तानुसारं भारतीय-ऋतु-विभागेन जम्मू-कश्मीर-लद्धाखादि-उत्तुङ्ग-भूभागेषु तमिलनाडु-पुदुच्चेरी-तटीय-प्रदेशेषु च सघनवृष्टेः पूर्व-सूचना प्रकाशिता। तथा च शुक्रवासरं यावत् देहली-पञ्जाबादि-मध्य-क्षेत्रेषु झञ्झावातेन सह वज्रपातस्य अतिवृष्टेश्च सम्भावना समावेदिता।

-------------------------------------------

## क्रिकेट

पुरुष-क्रिकेटस्पर्धायां भारतं वेस्ट-इन्डीज-दलं च अद्य हैदराबादनगरे चतुर्थे विंशति-प्रतिविंशतिः अन्ताराष्ट्रिय-क्रिकेटद्वन्द्वे परस्परं स्पर्धिष्यतः। एषा प्रतिस्पर्धा भारतीय-मानक-समयानुसारं सायं सप्त-वादने प्रारप्स्यते। पञ्चस्पर्धात्मिकायाम् अस्यां शृङ्खलायां भारतं पूर्वमेव द्वि-एकम् इत्यङ्कैः अग्रे वर्तते , यतः विगते रविवासरे इन्दौर-नगरे सम्पन्नायां तृतीयायां विंशति-प्रतिविंशतिः प्रतिस्पर्धायां भारतेन वेस्ट-इन्डीज-दलं चतुर्दश-धावनाङ्कैः पराजितम् आसीत्।

।। इति वार्ता: ।।